International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(6): 155-158
© 2017 IJSR
www.anantaajournal.com
Received: 29-09-2017
Accepted: 30-10-2017

**Dr. Vishwanath Hegde**
Dept. of Advaita Vedanta, Rashtriya Sanskrit sansthan, Ekalavya Campus, Agartala, Tripura, India

**Correspondence**
**Dr. Vishwanath Hegde**
Dept. of Advaita Vedanta, Rashtriya Sanskrit sansthan, Ekalavya Campus, Agartala, Tripura, India

# सांख्यमतरीत्या यागाङ्गहिंसायाः अधर्मजनकत्वनिरूपणम्

**Dr. Vishwanath Hegde**

**प्रस्तावना**

षट्सु आस्तिकदर्शनेषु सर्वज्ञकपिलप्रणीतं सांख्यदर्शनं महीयतेतमाम् । प्रकृतिपुरुषाविवेकजन्यबन्धस्य तयोर्विवेकेनैव नाश इति वदतां सांख्यानां मते पञ्चविंशतितत्त्वानि प्रसिद्धानि । तत्र पञ्चविंशः भवति पुरुषः । स च अविवेकनिमित्तेन दुःखत्रिकेण सम्पीडितः शोकमोहादिकमनुभवन् तत्परिहारसाधनं जिज्ञासते । तत्र दुःखनाशाय शास्त्रप्रतिपाद्यः प्रकृतिपुरुषविवेक एव साधनम् इति सांख्यसिद्धान्तः । ननु लौकिकेनोपायेन दुःखस्यान्तो भविष्यतीति दृष्टं लोके इति चेन्न, लौकिकेनोपायेन दुःखस्य आत्यन्तिकः, एकान्ततश्च नाशो न भवतीति तदर्थं सांख्यप्रतिपाद्योपाय एव शरणीकरणीयः। ननु तथापि दुःखस्य तथाविधनाशः वैदिकेनोपायेनैव साध्यः इत्यतः दुष्प्राप्यस्य प्रकृतिपुरुषविवेकस्य नोपादेयत्वं सम्भवति । तथा च 'स्वर्गकामो यजेत' इत्यादीनि वाक्यानि वैदिककर्मणां त्रैकालिकदुःखासम्मिश्रं सुखात्मकं स्वर्गप्राप्तिलक्षणं फलं ब्रुवते । स्वर्गश्च

> 'यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् ।
> अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम् ॥'

इति दुःखविरोधी सुखविशेष एव । किंच सः स्वर्गः 'अपाम सोम अमृता अभूम'[1] इत्यादिश्रुतिवाक्येभ्यो नित्य इत्यपि ज्ञायते । तस्मात् वैदिककर्मणा दुःखस्य आत्यन्तिकः एकान्ततश्च नाशो सम्भवतीति युक्तम् इति चेन्न । यथा दृष्टोपायेन दुःखस्य अत्यन्ताभावः न भवति तथैव वैदिकेनापि कर्मणा । तत्र च हेतवः वैदिककर्मणाम् अविशुद्धियुक्तत्वम्, क्षययुक्तत्वं, अतिशययुक्तत्वं चेति[2] । एतेषु वैदिककर्मणाम् पश्वादिहिंसाजन्याधर्मयुक्तत्वात् अविशुद्धियुक्तत्वं कथमिति सांख्यशास्त्रानुसारेण प्रबन्धेऽस्मिन् विचार्यते ।

तत्र सोमादियागेषु वैदिककर्मसु यागाङ्गतया पशुबीजदिवधा क्रियते । तस्य च हिंसात्मकत्वात्, हिंसायाश्च पापजनकत्वात् हिंसानिमित्तपापसंयुक्तेन सोमयागेन दुःखमपि जायते । तथा च शास्त्रं 'न हिंस्यात् सर्वा भूतानि' इति ।

---

1 ऋ.८/४८/३

2 दृष्टवदानुश्रविकः, सह्यविशुद्धिक्षयातिशययुक्तः (सांख्यकारिका-२ )

एवं च साध्यसोमादियागनिरूपिता या पशुबीजादिवधनिष्ठा साधनता सैवात्र अविशुद्धिरित्यर्थः । इत्थं होम-देवपूजन-दक्षिणाप्रदानादिरूपपुण्यजनककर्मसाध्यस्य सोमयागादेः यत् पशुहिंसन-बीजवधादिरूपपापजनककर्मसाध्यत्वं तदेव सोमयागादेरविशुद्धियुक्तत्वमिति । तथा च 'कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम्'[3] इति सूत्रे योगभाष्ये भगवता वेदव्यासेनापि 'शुक्लकृष्णा बहिःसाधनसाध्या तत्र परपीडानुग्रहद्वारेण कर्माशयप्रचयः' इत्येवं यागस्याविशुद्धियुक्तत्वमभिहितम् । अस्याः व्याख्याने वाचस्पतिमिश्राः 'यद् यावद् बहिःसाधनसाध्यं, तत्र सर्वत्रास्ति कस्यचित् पीडा । न हि व्रीह्यादिसाधनेऽपि यागादिकर्मणि परपीडा नास्ति । अवघातादिसमये पिपीलिकादिवधसंभवात्, अन्ततो बीजादिवधेन स्तम्बादिभेदोत्पत्तिप्रतिबन्धात् । अनुग्रहश्च दक्षिणादिना ब्राह्मणादेरिति' इत्यनेन यागादिकर्मणः पुण्यकर्मयोगेन शुक्लत्वं, पशुवधादिपापकर्मयोगेन कृष्णात्मकत्वादविशुद्धियुक्तत्वमुक्तम् ।

इदमेव प्रदर्शयन् पञ्चशिखाचार्यः 'स्वल्पः सङ्करः सपरिहारः सप्रत्यवमर्षः' इत्यत्र सङ्करशब्देन ज्योतिष्टोमादिजन्यस्य प्रधानापूर्वस्य धर्मस्य पशुहिंसादिजन्येन अनर्थहेतुना पापेन सह सामानाधिकरण्यरूपः संसर्गः अथवा साङ्कर्यमुक्तम् । किन्तु तद्यागेन जन्यस्य सुखापेक्षया पापस्य अल्पत्वात् सः प्रायश्चित्तादिना परिहार्यो वर्तते । यदि प्रमादवशात् प्रायश्चित्तमननुष्ठितं चेत् तद्दुःखं जनयत्येव । अत्र 'अङ्गापूर्वं प्रधानापूर्वातिशयमुत्पाद्य विनश्यतीति' मतं नाभ्युपगम्यते । यतः पशुहिंसाद्यङ्गापूर्वस्य प्रधानोपकारनरकोभयजनकतया प्रधानोपकारमात्रानन्तरमेव तस्य विनाशे नरकानुपपत्तेः, तदा फलमदत्वा कर्म नश्यतीति स्वीकर्तव्यं भवेदिति दोषः ।

**पूर्वमीमांसकानामाक्षेपः**

ननु धर्मवत् इयं हिंसा इयमहिंसा इत्यत्र श्रुतिरेव प्रमाणम् । निखिलस्यापि जगतः कल्याणाय प्रवृत्तो वेदः कथं पुरुषं हिंसायां प्रवर्तयेत्? अतः वेदप्रतिपादिता हिंसा अहिंसैव । अत एव कुमारिलभट्टैरपि 'द्वेषपूर्वकं प्राणिवध एव हिंसा'[4] इत्यभिहितम् । किं च 'अपवादो ह्युत्सर्गं बाधते' इति न्यायात् 'मा हिंस्यात्सर्वभूतानि' इति सामान्यशास्त्रं विशेषशास्त्रेण 'अग्नीषोमीयं पशुमालभेत' इत्यनेन बाध्यते । तद्यथोक्तं 'येन नाप्राप्ते यो विधिरारभ्यते स तस्यापवादः' इति । यदाहुर्भट्टवार्तिककाराः

> 'अवश्यमेव सामान्यं विशेषं प्रति गच्छति ।
> गतमात्रं च तत्तेन विशेषे स्थाप्यते ध्रुवम्॥' इति ।

विषयेऽस्मिन् श्रुतिराह 'अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्यः'[5] इति । अत्र शास्त्रानुज्ञाविषयेभ्योऽन्यत्र स्थावरजङ्गमानि सर्वाणि भूतानि अपीडयन् वर्तेत इति 'अन्यत्र तीर्थेभः' इति पदयोरर्थः । मनुरपि –

> 'यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा ।
> यज्ञस्य भूत्यै सर्वस्य तस्माद्यज्ञे वधोऽवधः॥'[6] इत्याह।
> किंच – या वेदविहिता हिंसा नियतास्मिंश्चराचरे ।
> अहिंसामेव तां विद्याद्वेदाद्धर्मो हि निर्बभौ ॥'[7] इति च ।
> वराहपुराणेऽपि 'हिंसा त्ववैदिकी या तु तयाऽनर्थो ध्रुवं भवेत्।
> वेदोक्तया हिंसया तु नैवानर्थः कथंचन ॥'

इति वैदिक्याः हिंसायाः हिंसाभावत्वमुक्तम् । अतः यागे क्रियमाणया हिंसया अधर्मो न जायते इत्यतः यागस्य विशुद्धत्वं स्पष्टम् इति मीमांसकाः ।

**अत्र सिद्धान्तः -**

अत्र मीमांसकेन यदुक्तं 'न हिंस्यात् सर्वाभूतानि' इति सामान्यशास्त्रं 'अग्नीषोमीयं पशुमालभेत' इति विशेषशास्त्रेण बाध्यते इति तन्न । तयोः विरोधाभावात् । सति विरोधे सामान्यशास्त्राद् विशेषशास्त्रं प्रबलम् न तु अविरोधेऽपि । यतः बाध्यत्वे दुर्बलत्वमात्रं न हेतुः किन्तु विरोधोऽपि । तथाहि अनयोः भिन्नविषयकत्वात् न विरोधः । 'न हिंस्यात्' इति निषेधः हिंसायाः बलवदनिष्टसाधनत्वरूप-अनर्थहेतुत्वं ज्ञापयति । नात्र अक्रत्वर्थहिंसायाः अनर्थहेतुत्वमिति वर्णने प्रमाणमस्ति । 'अग्नीषोमीयं पशुमालभेत' इत्यनेन वाक्येन पशुहिंसायाः क्रत्वर्थमुच्यते न तु तेन अनर्थहेतुत्वाभावः । 'मुख्यफलाजनकत्वे सति मुख्यफलजनकव्यापारजनकत्वम्-अङ्गत्वम्' इति प्रधाननिर्वहणद्वारा तज्जन्यजनकत्वम् अङ्गत्वम् । न त्वनेन 'न् हिंस्यात्..' इतिवत् बलवदनिष्टाननुबन्धीष्टसाधनत्वं बोध्यते । अङ्गविधीनां विनियोगमात्रतात्पर्यकत्वेन बलवदनिष्टाननुबन्धित्वबोधने तात्पर्याभावात् ।

अयमर्थः – 'न हिंस्यात्..' इति निषेधेन 'हिंसा पुरुषानर्थकरी' इत्येव बोध्यते, न तु 'हिंसा यागोपकारिणी न' इत्येवमपि, एवं 'पशुमालभेत' इति वाक्येनापि 'हिंसा यागोपकारिणी' इत्येव ज्ञाप्यते, न तु 'हिंसा नानर्थकरी' इत्येवमपि । एवं च अनयोः भिन्नविषयत्वान्न विरोधः इति । यथा 'आमतक्रं कोष्ठे कफं हन्ति' इति वाक्यस्य इष्टसाधनत्वं

---

[3] यो.४/७
[4] मीमा. १/१/२
[5] छा.८/१५/१
[6] मनु-५/३९
[7] मनु-५/४४

विषयः, 'कण्ठे च तत् तक्रं कफं करोति' इति वाक्यस्य अनिष्टसाधनत्वं विषयः इति विषयभेदादुभयोरविरोधः तद्वत् असमानविषयकत्वात् 'न हिंस्यात्..' 'पशुमालभेत' इत्यनयोः न बाध्यबाधकभावः । तस्मात् पशुहिंसायाः श्येनवत् अनर्थकरत्वमेव ।

तदेवोक्तं ब्रह्मविद्याभरणे 'प्राणवियोगफलोपहितस्तदनुकूलो व्यापारो हिंसा, यागीयपश्वालम्भोऽपि भवति तथेति कथं न हिंसा?' इति । हिंसायाः अनर्थकरत्वं स्मृतिषु बहुत्र प्रतिपादितम् । तथा च महाभारते केनचिन्निमित्तेन शप्तेन धर्मेण मृगयोनिमापन्नेन ' यदि त्वां कश्चिद् यज्ञे हन्यात् तदा तव मृगत्वं नङ्क्ष्यति' इति शापान्तं बुद्ध्वा श्यामाकनीवारादिचरुणा देवयजनं कुर्वाणं कंचिद् वनवासिनं सत्यनामानं ब्राह्मणमुपसृत्य छलेन 'पशुपुरोडाशं विना यज्ञोऽयमङ्गहीनो न स्वर्गफलकः, पशुक्रयणासामर्थ्ये तु मां भोः प्रक्षिप होत्रे त्वं गच्छ स्वर्गमनिन्दित इत्येवं प्रलोभ्य स्वकीयहिंसायां प्रवर्तितः सः । प्रवृत्तस्य च तस्यानुष्ठितं बहु तपो नष्टम्' इत्येवमाख्यायते ।

> 'तस्य तेनानुभावेन मृगहिंसात्मनस्तदा ।
> तपो महत्समुच्छिन्नं तस्माद् हिंसा न यज्ञिया ॥'[8]
> इति ।

एवं **विचख्नुगीते**ऽपि -
'अव्ययस्थितमर्यादैर्विमूढैर्नास्तिकैर्नरैः।
संशयात्मभिरव्यक्तैर्हिंसा समनुवर्णिता।
सर्वकर्मस्वहिंसा हि धर्मात्मा मनुरब्रवीत् ॥' इति हिंसां निन्दित्वा
'पायसैः सुमनोभिश्च तस्यापि यजनं मतम्।' इत्येवं सात्त्विकं यजनमेवाभिहितं न हिंसादिमिश्रम् ।

> ननु 'यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।
> यज्ञोऽस्य भूत्यै सर्वस्य तस्माद् यज्ञे वधोऽवधः ॥
> या वेदविहिता हिंसा नियताऽस्मिंश्चराचरे ।

अहिंसामेव तां विद्याद् वेदाद् धर्मो हि निर्बभौ ॥' इति मनुवाक्यैः, 'हिंसा चैवाविधानतः' [9] इत्यादिभिश्च अवैधहिंसाया एव अधर्मजनकत्वमुक्तम् । 'अहिंसन् सर्वाभूतान्यन्यत्र तीर्थेभ्यः' इति तीर्थपधाभिधेययज्ञादिभ्यो अतिरिक्तस्थल एव हिंसात्वमुक्तं छान्दोग्यश्रुत्या । अतः यज्ञे क्रियमाणायाः हिंसायाः न अधर्मजनकत्वमिति चेत् अत्राहुः मञ्जूषाकाराः – 'मनुवचने 'अवधः' इत्यादौ 'अनुदरा कन्या' इतिवत् अल्पार्थे नञः सत्त्वात्, अन्यथा 'घटोऽघटः इतिवद् अस्याबोधकत्वेन अवधपदस्य पापाजनकत्वलक्षणापत्तेः।' इत्युक्तम् । एतेन 'अध्वर इति यज्ञनाम, ध्वरतिर्हिंसाकर्मा, तत्प्रतिषेधोऽध्वरः' इति निरुक्तवचनेऽपि नञो अल्पार्थत्वं ज्ञेयम् । 'अन्यत्र तीर्थेभ्यः' इति श्रुतेस्तु अवैधहिंसात्यागस्य इष्टसाधनत्वमुच्यते न तु वैधहिंसायाः अनिष्टसाधनत्वाभावः । पातञ्जलभाष्येऽपि 'यदि कथञ्चित् पुण्यावापगता हिंसा भवेत्, तदा तत्र सुखप्राप्तौ भवेदल्पायुः'[10] इति । अत एव क्षत्रियाणामपि युधिष्ठिरादीनां स्वधर्मयुद्धेन जातज्ञातिहिंसायां प्रायश्चित्तश्रवणम् ।

तथा च भागवते –

> "क्षत्रधर्मे स्थितो जन्तून्यवधीर्मृगयादिभिः ।
> समाहितस्तत्तपसा जह्यघं मदपाश्रिताः ॥' इति
> मुचुकुन्दं प्रति कृष्णवचनम् ।

तथा च शुद्ध्यापादकदण्डप्रायश्चित्तरूपहननस्य पापाजनकत्वेऽपि अदण्डनीयाप्रायश्चित्तिपशुहननस्य पापाजनकत्वे प्रमाणाभावः । अतः तद्दृष्टान्तबलेन यागीयपशुहननस्य पापाजनकत्वमास्थातुं नैव शक्यते । अन्यत्र तैत्तिरीयश्रुतौ 'परागावर्ततेऽध्वर्युः पशोः संज्ञप्यमानात्' इति पापभयेन अध्वर्योः पशुहननपराङ्मुखत्वाभिधानात् ।
किं च ऋत्विजां प्रायश्चित्तोऽपि श्रूयते । यदि यागीयपशुहिंसा यदि अधर्मजनिका न स्यात् ततो कुतः प्रायश्चित्तो उक्तः स्यात् । अग्निप्रार्थनापि श्रूयते –

> "यत्पशुर्मायुमकृतोरो वा पद्भिराहते ।
> अग्निर्मा तस्मादेनसो विश्वान् मुञ्चत्वं हसः ॥'
> इति मन्त्रवर्णे पशुहिंसाजन्यपापविमोचनाय अग्निप्रार्थना श्रूयते ।

ननु यदि यागीयहिंसा अनिष्टहेतुः तर्हि को वा प्रवर्तयेत् तस्मिन् कार्ये इति चेत् उच्यते – यथा अनिष्टहेतुत्वेऽपि श्येनयागादौ क्रोधान्धस्य तद्दोषसहिष्णोरेव प्रवृत्तिस्तथैव अत्रापि तद्दोषसहिष्णोरेव उत्कटफलरागवशात् प्रवृत्तिर्भविष्यति । अर्थात् स्वर्गसुखापेक्षया हिंसाजन्यदुःखस्य अल्पत्वात् यागादौ प्रवृत्तिः भविष्यति । तदेव 'कुशलस्य नापकर्षायाऽलम्' इति पञ्चशिखाचार्यवचनेन व्यक्तीकृतम् ।
एतावता यज्ञादौ मांसभक्षणेन कल्याणम् अन्यत्र भक्षणेन अनिष्टप्राप्तिरित्युपदेशः सर्वदा वृथा मांसभक्षणात् प्रतिनिवर्तयितुमुच्यते इति वक्तुं शक्यते । यथा शत्रुगृहे भुञ्जानं स्वपुत्रं 'विषं भुङ्क्ष्व' इति माता क्रोधेन वदति, तत्र

---

[8] शा.मो.२७२/१८
[9] म.१२/७
[10] यो. २/३४

विषभक्षणे न तात्पर्यं किन्तु शत्रुगृहभोजनात् स्वपुत्रं निवर्तयितुं तथा उच्यते तद्वदत्रापि इत्यर्थः । यागादावेव मांसभक्षणं कर्तव्यमित्यर्थकेन उपदेशेन अन्यत्र मांसभक्षणं निषिध्यते । मनुरपि 'यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवम् । तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविः' । (मनु.११/९५) इति । न कस्मिन्नपि शास्त्रे हिंसा धर्म इति नोच्यते । परम् अहिंसा परमो धर्म इति च श्रूयते । अत एव हिंसायाः अधर्मजनकत्वे न कापि विप्रतिपत्तिः । यागाङ्गहिंसा यागबहिर्भूतहिंसापेक्षया अल्पानर्थहेतुरित्येवार्थः न तु हिंसायाः अभावे । अत एव पञ्चशिखाचार्येणापि स्वल्पः सङ्करः सपरिहारः सप्रत्यवमर्षः' इत्युक्तम् इति शम् ।

**सन्दर्भग्रन्थसूची-**


1. श्रीशिवनारायणशास्त्री-सांख्यकारिका – चौखम्बाविद्याभवनम्-२००१
2. मनुस्मृतिः – समाजपुस्तकालयः धारवाड, कर्णाटकम् – २०००
3. याज्ञवल्क्यस्मृतिः – समाजपुस्तकालयः धारवाड, कर्णाटकम् – २०००
4. पातञ्जलयोगसूत्रम् – श्रीवासुदेवशर्मा – चौखम्बा विद्याभवन वाराणसी १९९१
5. ईशादि नौ उपनिषत्, गीता प्रेस् गोरखपुर्, २००४
6. जैमिनिसूत्रम्- रञ्जनपब्लिकेशन्स्- २०११
7. महाभारतम् – Holybooks.com